Shri Raghunath Temple MSS. Library,
JAMMU

No. १४५२

Title अनुमान मणि दीधिति टिप्पनी

Author म॰ म जगदीश:

Extent १५ Age x

Subject न्याय वैशेषिकं

हनुमानबाणदीपिकाटिप्पणी

१० पत्राणि

१४५२

स्याभावत्वं दुर्घटमिति भावः नन्वेवमुक्तरीत्या प्रवृत्त्यादावपि फलानुपधायकत्वान्निश्चयस्य प्रमात्वग्रहः प्रतिबंध
को न स्यादत आह तत्रेष्टापत्तिमाह प्रमात्वनिश्चयस्येति ननु प्रमात्वनिश्चयस्याविरोधित्वे भ्रमत्वेन ग्रहोऽप्रमाण्याद्
बाधादिनिर्णये याद्विशिष्टधीर्न स्यादत आह सर्वत्रेति हेत्वभाव इति इष्टोनार्थभ्रमत्वाग्रहस्य प्रयोजक इत्यन्वय
थात्वे हेतुत्वे प्रतिबंधकत्वे च प्रमात्वनिश्चयप्रयोजकः भवेदित्यन्वयः क्रमेणाशाद्वधि प्रवृत्त्यनुमित्यादेः कारणता
वच्छेदकनिष्ठं भवेदिति तदर्थः ननु प्रमात्वज्ञानस्यापि विरोधित्वे शंखो न स्वेत इति भ्रमस्य त्वेपि शंखः श्वेत इत्यनुमि
तिर्न स्यादत्तस्तत्रेष्टापत्तिमाह शंखादाविति स्वरूपेति प्रमात्वेन निश्चयमाने पि सर्थः मिश्रोक्तमाशंकते अ
थेति लाघवेनेति बाधनिश्चयाभावहेतुत्वापेक्षया लाघवेनेत्यर्थः प्राथमिके प्रत्यक्षत्वमिति चाराद्दारोपि लड्डुकत्वादि
रहविशिष्टो बाधनिश्चयाभावस्यैव विशिष्टप्रत्यक्षहेतुत्वे ननु संसृष्टत्वज्ञानस्य संशयपनाह शाब्दानुमित्योरिति ज
न्यतानुप्रत्यक्षांश्च विशिष्टज्ञानत्वेन विशिष्टानुमितित्वादिना वेत्यवधेयं यद्यपि बाधनिश्चयदशायां स्मरणोप

मिसत्त्वस्य तत्रापि संसृष्टत्वधियः कारणत्वमुचितं तथाप्युपमितेरतिरिक्तत्वे विवादात्‌ न स्मरणस्य योद्बोधकवि
रहादपि बाधनिश्चयदशायां अनुमितिसंभवात्‌ स्याद्वानुमितौ रेवोपादानं ननु बाधस्यानुमितित्वविरोधित्वे हेत्वा
भासतानस्यादत आह आस्तांश्चेति तस्यैवेति पक्षसाध्ययोः संसृष्टत्वज्ञानस्यैवेत्यर्थः परामर्शस्येति विरोधितया
हेत्वाभास इति पूर्वेणान्वयः दोषमात्रस्यैवानुमितिजनकज्ञानविरोधित्वादिति भावः ननु साध्ययोः संसृष्टत्वज्ञानस्या
नुमितिहेतुत्वे धूमव्यापकवह्न्यभाववज्जामित्यादिपरामर्शजन्ये धूमाभाववद्दर्शी[illegible]ननुमितिर्न स्यात्‌ साध्याप्रसिद्ध्या
तत्संसृष्टत्वज्ञानसंभवादितस्तत्रेष्टापत्तिमाह विलक्षणतां चेति ननु परामर्शस्याशुत्वे समकालोत्पन्नमुत्तरोत्प
न्नेवा संसृष्टत्वज्ञानं हेतुस्तत्र नाघदसाह संशयेति संशयासत्त्वसमये परामर्शोत्पादेनुमित्यनुत्पादप्रसंगादित्यो
जनाप्रागुत्पन्नस्य निश्चयात्मकसंसृष्टत्वज्ञानस्यानुमितिहेतुत्वसंभावितं पक्षासंवसार्थमवेक्षितया परामर्शो
त्तरानुमितिक्षणात्पत्स्यनाशादलो निश्चयासत्त्वदशायामिति नोक्तं ननु परामर्शसमानकालोत्पन्नमेव संशयज्ञान हेत्व

ननु मितिहेतुरिति द्वितीयस्तु कल्पस्तस्य सिद्धत्वनियमेप्यनुमित्यैव पक्षतासंभवादत आह सिद्धौ सा साधयिषेति
नेति परामर्शदशायां तत्सामग्र्याः प्रतिबंधात् साध्यसंशयासंभवात् सिद्धिपर्यंतानुशरणं ननु परामर्शोत्तरमेव संश
यात्मकं संस्पृष्टज्ञानं भविष्यतीत्यस्तु तरकल्प इत्यत आह सतीति संशयायोगादिति व्याप्यदर्शनोत्तरं सा
ध्यवत्तानिश्चयस्यासंभवेपि पक्षासंपत्त्यर्थः ननु मित्साप्रेक्षणात् तावत्पर्यंतं परामर्श एव न तिष्ठेदिति भाव ननु भ्रमत्व
ज्ञानानास्कंदितबाधनिश्चयत्वेन न प्रतिबंधकत्वं किंतु प्रमात्वनिश्चयास्कंदितबाधज्ञानत्वेनैव तथात्वे निश्च
यत्वेऽस्योभयात्रप्रवेशेपि भ्रमत्वापेक्षया प्रमात्वस्य लघुत्वादिसाशंक्य निराचष्टे एतेनेति स्वरूपसत्यपि बा
धनिश्चये शाब्दमानसादिज्ञानानुत्पादेनेत्यर्थः ननु बाधग्रहस्य प्रमात्वानिश्चयदशायां शाब्दादिज्ञानानुत्पादो वि
वादग्रस्त इत्यत आह विपरीतमेवं चेति प्रमात्वेन निश्चयमानबाधज्ञानत्वापेक्षया भ्रमत्वज्ञानानास्कंदितबाध
निश्चयत्वे नैव सर्वत्र प्रतिबंधकतायां लाघवं प्रमात्वनिश्चयत्वापेक्षया बाधनिश्चयत्वलघुत्वादित्यर्थः नवा

३२ 32

सर्वत्र साध्ये बाधग्रहस्य प्रमात्वं भ्रमत्वापेक्षया लघुत्वेन तद्घटितमेव प्रतिबंधकतावच्छेदकं स्यादित्याशयेनाह स्फु
टतरं चेति तल्लिलाघवं स्फुटिकर्तुं स्वमतं व्याकरोति गोत्वाद्यप्रकारकेत्यादि गौरवं स्फुटिकर्तुमपरमतं व्याकरोति
बाधग्रहश्चेत्यादिप्रकारकत्वादित्यादिना हेत्वभाववद्विशेष्यकगोत्वाभावसोपग्रहर ननु भ्रमात्वज्ञानानास्कं
दित बाधनिश्चयत्वेन प्रतिबंधकत्वे स्वाप्रामाण्यनिश्चयानास्कंदित एव प्रमात्वनिश्चयो निविष्ट इति लाघववै
परीत्यात् भ्रमात्वेन निश्चयमानं बाधज्ञानमेव प्रतिबंधकं युक्तमत आह उक्तप्रायं चेति तथा च प्रमात्वाज्ञा
नस्य प्रयोजकत्वे व्याप्यादिज्ञानप्रसत्पि प्रमात्वेन निश्चयमानमेव व्यभिचारादिज्ञानं विरोधीस्यादिति भावः
एवं प्रमात्वनिश्चये सैव प्रतिबंधकत्वमुक्तं न तु प्रमात्वेन निश्चयमानस्येत्यर्थः प्रायपदं यद्यपिदं प्रतिवेदिनत्
रं तथापि प्रमात्वस्य नानाविधत्वादेकबाधप्रमात्वेन निश्चयमानबाधज्ञानत्वेन प्रतिबंधकत्वे अन्यविधप्रमात्वे
नानिश्चयमाने सत्यपि बाधग्रहे अनुमितिस्यादस्माकं तु यद्यद्प्रामाण्यज्ञानदशायां बाधनिश्चये सत्यपि हेरंब

विशिष्टबाधतस्तदप्रामाण्यज्ञानाभावकूटविशिष्टबाधनिश्चयत्वेनैव प्रतिबंधकत्वाद् अप्रामाण्यज्ञानाविधत्वेपि प्रस
क्ताभावादिसेवून्मूलयुक्तिरिति ध्येयं ननु तद्व्याप्यदर्शनाभावविशिष्टस्यैव बाधनिश्चयस्य तद्विशिष्टधिप्रति
बंधकत्वाद्बाधस्यानुमितिरोधीत्वं दुर्घटमित्याशंक्य निराचष्टे नचेति वाच्यमित्यन्वयः अकिंचित्करत्वं प्रति
बंधाक्षमतच्छत्वेति बाधनिश्चयसत्वेपि तन्नाशानंतरमेवेति बाधनिश्चयनाशानंतरमेवेत्यर्थः तथाच सत्
तिबाधे प्रत्यक्षमप्यसिद्धमेवेति भावः सत्यपि बाधनिर्णये लौकिकादिप्रत्यक्षस्यानुभविकत्वमालक्ष्याः परै
राधीति प्राचैरपि दोषविशेषलौकिकसन्निकर्षादिजन्यात्मकप्रत्यक्षविशेष एव विपरीतनिश्चयविशे
षस्यैव समानेंद्रियजन्यबाधनिश्चयस्यैव तथात्वोपगमात् तत्तद्विशेषदर्शने अकिंचित्करत्वोपगमादि
त्यर्थः सत्यपि यावत्ताभावव्याप्यः दर्शने संस्कारदोषापीतत्वादिभ्रमस्यापीतत्वाभावव्याप्यशुषविरोधित्वेनाकिं
चित्करत्वात् कचिदित्युक्तं तथाच दोषविशेषलौकिकसंनिकर्षादिजन्यस्यात्पीतत्वादिमञ्छाशुषादिकंप्र
ला

33

33

तिविशेषदर्शनाभावविशिष्टतदभावचाक्षुषत्वादिनाप्रतिबंधकत्वेप्यनुमित्सादौतदभावनिश्चयत्वेनैवप्रतिबंध
कत्वं ननु तत्र विशेषदर्शनस्योत्तेजकत्वं एतदेव स्फुटीकरोति न हीति सह विपरीतनिश्चयः गौरवादिति परोक्ष
विशिष्टबुद्धिं प्रति लाघवाद्विपरीतनिश्चयत्वमात्रेण प्रतिबंधकत्वादिति भावः प्रामाणिकत्वगौरवस्यादोष
त्वादनुमानाभावाच्चेति ननु दोषविशेषजन्यप्रत्यक्षविशेषदर्शनाभावविशिष्टविपरीतनिश्चयमात्रस्यैव
विरोधित्वाद्विपरीतनिश्चयविषयस्यैवेति प्रागुक्तं विफलमत आह न वेति चाक्षुषादिमतोमानासादित्सा
दिनाऽनुमानिकाद्युपग्रहः तथापि मानसादिबाधनिश्चयदशायां दोषविशेषादिचाक्षुषाद्युत्पत्त्यर्थ
मेव समानेऽप्यजन्यात्मनस्य विशेषस्यतस्याभिधानमिति भावः ननु सत्यपि बाधनिर्णये विशेषदर्शिनो
नारङ्कचित्काद्बोधस्यानुभविकत्वात् परोक्षबुद्धिस्थानेऽपि विशेषदर्शनस्योत्तेजकत्वमन्यथा लोप
योगस्याऽदत आह उपपद्यते चेति क्वचिदिति यत्र विशेषदर्शनं न बाधस्याप्रामाण्यग्राहकं तत्र बाध हेत्व:

नास्योत्तरमेव विशिष्टबुद्धिस्वीकारादिति भावः न चेति वाच्यमित्यन्वयः ज्ञानलक्षणेति तथा च परामर्शभावादेव
नुमित्युत्पत्तौ बाधस्य तत्र प्रतिबन्धकत्वे मानाभावः अनुपपत्तेर्व्यभिचारधिरेवेति साध्याभाववान् पक्ष
हेतुमानित्याकारस्यापि व्यभिचारधीत्वादिति भावः भेदादिति तथा च यत्र बाधनिश्चयोत्तरं परामर्शस्तत्र
व्यभिचारज्ञानस्यानावश्यकत्वाद्बाध एवानुमितिप्रतिबन्धकं ज्ञानमिति भावः विरोधिनोपि तद्व्याप्यत
दभावयोरेकनिश्चयगोचरत्वमभ्युपेत्याह अभेदेपीति बाधग्रहपरामर्शयोः रभेदेपि सर्थपरस्परेति
हेतौ साध्याभाववद्वृत्तित्वाभावगाहिन एव ज्ञानस्य व्यभिचारधीत्वान्निरुक्तसमूहालंबनस्य च
अतथात्वादिति भावः ननूक्तसमूहालंबनस्यैव हेतौ साध्याभाववद्वृत्तित्वाभावगाहित्वे को विरोध इत्यत आह
एकत्रेति निश्चये त्वस्य स्वारसिकत्वादित्येन वृत्त्यादिविशेषेतु साध्यव्यभिचारितरतदभावांश्चेति समुच्च
यस्योपगमेपि न क्षतिः ननु प्राचां मते हेतुसाध्याभाववयोरेकधर्मिवैशिष्ट्यावगाहिज्ञानस्यैव व्यभिचार

द्धित्वा साध्याभाववान् हेतुमानित्यादिग्रहस्यैवोक्तसमूहालंबनस्यापि व्यभिचारज्ञानत्वमेवेत्यत आह पूर्वे
श्चेति लिंगत्वानात्मनोऽनुमितिकरणस्य पूर्णत्वं व्याप्यादिमत्त्वपरामर्शात्संपत्तिः अकिंचित्करत्वादनुमि
त्यनुत्पत्त्यप्रयोजकत्वात् तथा चावश्यं तत्र बाधनिश्चयत्वेन प्रतिबंधकत्वं वाच्यमिति भावः नन्वालिं
गोपधानपक्षस्य प्रामाणिकत्वे व्यभिचारज्ञानस्यापि सत्त्वादेवानुमितिविरोधित्वान्न बाधनिर्णयः प्र
यत्नी सोऽधिकार त आह उक्तश्चेति साध्यादेरित्यादिपदाभ्यां पक्षतावच्छेदकादेः साध्यवद्वृत्तित्वोपग्र
हः गृहीते साध्यादेः पक्षावृत्तित्वात् इत्यादिग्रहासंभवान्तोक्तसमाधानं निरस्यपि तु परिस्कृत्य दर्शयति यत्त्वित्यादि
नाऽर्द्धनिश्चयरूपत्वे अर्धनिश्चयकार्यकारित्वेनानुकार्यानुपपत्तोऽविशामाण्यग्रहः सामग्रीवशादेवा
भ्युपेतव्य इति साध्याभाववत्ताज्ञानस्य कार्यत्वात् साधने साध्याभाववद्वृत्तित्वज्ञानं तत्कारित्वसं
पत्तय इत्यर्थः साध्याभाववद्वृत्तित्वप्रामाण्यकसाध्याभाववत्ताज्ञानत्वेनैव हेतुत्वादिति भाव प्रथमो सन्नत्व हेरंब०

स्या किंचित्करत्वादाह उपजीव्यत्वाद्धेत्वर्थः तथा च नसद्धेतोरेवेति न्याय एव साध्याभावप्रमात्वनिश्चयस्यानुमिति
विरोधित्वे मानमिति भावः व्यभिचारज्ञाने प्रथमिकोपजीव्यत्वे व्यतिरेकमाह नत्विति तद्धानसाध्याभावज्ञा
नस्य प्रमात्वनिश्चयाधीनमित्यर्थः तस्य साध्याभावप्रमात्वनिश्चयस्य — त्वादिति व्यभिचारज्ञानस्य बाधनि
श्चयाभावस्थल एव प्रतिबंधकतायाः क्ल[…]प्तत्वादिति भाव नासाध्याभावज्ञानस्य प्रमात्वनिश्चयो व्यभिचार
ज्ञानस्योपजीव्य इत्याशयेनाह अग्रहीतेति अगृहीताप्रामाण्यकस्यैव साध्याभाववत्त्वादिनिश्चयस्य साध्या
भाववद्वृत्तित्वज्ञानादिरूपस्य स्वकार्यकारित्वादित्यर्थ अथागृहीताप्रामाण्यकस्यैव ज्ञानस्य स्वकार्यकारि
त्वेननु: निश्चितप्रामाण्यकस्य । यत्र किं विनिगमकमत आह अन्यथेति यदि निश्चितप्रामाण्यकस्यैव ज्ञा
नस्य स्वकार्यसंपत्तये प्र अप्रामाण्यनिश्चयापेक्षा यां अनवस्थापात्तिरेवाधिकेत्यर्थः न चैवमप्यनिश्चय
स्य प्रामाण्यमानप्रयासो विफल इत्यत आह अप्रमाण्येति अस्त्वप्रमात्वेन निश्चयमानमेवार्थज्ञानं

34
35

स्वकार्यकारि तथापि यदि साध्याभाववत्त्वांशे निश्चयात्मकमेवाव्यभिचारज्ञानमनुमितौ विरोधस्यात्तदा तस्य विशिष्ट
वैशिष्ट्यबोधत्वनियमतद्धेतुः साध्याभाववत्तानिश्चयस्य प्रमात्वनिश्चयोव्यभिचारज्ञानार्थमव्येक्षणीयः
स्यान्नत्वेतदस्ति तदभावांशे संशयात्मनोपि व्यभिचारज्ञानस्यानुमितिविरोधित्वादन्यथा वायुरूपवान्स्प
र्शादित्यादिपक्षे साध्यसंदेहदशायामप्रयोजकत्वे नस्यादित्यस्वरसतात्पर्यमाभ्यामाह संशयेति साध्याभावां
शे संशयसाधारण्यस्येत्यर्थः मूलोक्तमेव संदंडमतं परिष्कृत्योपन्यस्यति यत्त्विति उपनीतकांचनमय
त्वं तद्विशिष्टवह्नित्वप्रमाकारेणयानुमितिस्तद्विरोधिसर्थः शुद्धवह्निव्याप्यवत्तानिश्चयोत्तरंसोभावि
तापाः कांचनमयवह्निमानिसनुमितेः पर्वते कांचनमयवह्निमानितिसनुमितेः पर्वते कांचनमयत्वेनवह्नि
र्नास्तितौ वाधनिश्चयदशायामनुदयादिति मान्यधिकरणेति यद्ददमुपलक्षणं वह्नौ कांचनमयत्वा
भावोप्युक्तानुमितिविरोधित्वादश्यमतेबाधपरामर्शविरोधित्वेनतस्याऽसिद्धत्वात्संभवादितिध्येयं ननु कांच हेरंब०

नमयवह्नित्वावच्छिन्नविधेयताकानुमितौतादृशवह्नित्वावच्छिन्नव्याप्यवत्तानिश्चयत्वेन हेतुत्वाद्वह्निसामान्यव्या
प्यवत्तानिश्चयाकुतस्तादृशवह्नित्वावच्छिन्नविधेयकानुमितेः संभावनायस्यान्नेरुक्तवाधः विरोधीत्यादिसा
शंकानिराचष्टेनन्वेतिविशिष्टसाध्याप्रसिद्ध्येतिवह्निविशिष्टसाध्यस्यव्यापकत्वाग्रहेनेत्यर्थः तेनपर्वतःकांचन
मयवह्नित्वप्रकारेणसाध्याप्रसिद्धावपिनतद्रूपेणानुमितेसंभवइतिभावः विशिष्टवह्नित्वावच्छिन्नविधेयताका
नुमितिंप्रत्येवविशिष्टवह्नित्वावच्छिन्नव्याप्यवत्तानिश्चयोहेतुप्रकृतेत्वितरवाधस्थलेइककांचनमयत्वेनिष्ट
प्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताकैववह्नेरनुमितिरतोविशिष्टसाध्यव्याप्यवत्तानिश्चयामा
वेपिनक्षतिरित्याशयेनपरिहरतिविशेष्यइत्यादिनानुशुद्धवह्नेः परामर्शेनकांचनमयवह्निप्रकारकानु
मितिहेतुस्तथासतिकांचनमयत्वानुपस्थितिदशायामपितादृशानुमित्यापत्तेस्तथाचकश्चप्रतिवंधकत्वमत·
कांचनमयत्वेनवह्न्यभावोवाधात्स्यादतआहशुद्धेतिवुपनयेतिकांचनमयत्वाद्युपस्थितिसहकारेणेत्यर्थः

34
30

तदभावइतिनचप्रागुक्तोऽधिकरणकांचनमयत्वेनवह्न्यादेर्बाधनिश्चयेविशिष्टसाध्यस्यव्यभिचारग्रहएवास्तिदोष
इत्यतआह तेनेतिविधिकरणकांचनमयत्वादिरूपेणसाध्यव्याप्तिग्रहस्यानपेक्षितत्वात्तथाव्यभिचारस्ताहृश
कांचनमयत्वाद्यवच्छिन्नप्रतियोगिताकसाध्याभाववद्वृत्तित्वग्रहोनदोषायेत्यर्थः शुद्धसाध्यव्याप्तिग्रहस्यै
वोपपत्तित्वादितिभावः मूलोक्तदूषणं प्रतिबंदिमुद्दयो[redacted]द्धरति उपनीतेत्विनुमितिपदेचप्रत्यक्षस्थलेविशि
ष्यदोषाणांहेतुत्वेसर्वांशप्रमासामग्रीसत्त्वं अप्रतिबंधकत्वंकाल्पतेतथानुमितिस्थलेपितन्मयाप्युवच्यमिति
भाव अनुपदेस्येति पत्राधेविवादस्ताद्दृशप्रामाण्यस्यैवविजयप्रयोजकत्वादन्यधेधर्मक्ततरमिति
प्रत्यक्षस्यापिशुक्तिसाधकत्वेनोपन्यासो नास्याद्ग्रजतत्वांशेतस्याप्रामाण्यादितिभावः फलासिद्धेति
फलमुपनीतावगाहित्वेन अनुमितेरनुभवस्तद्धिरहेणेत्यर्थ नसामग्र्यंतरेति नच प्रत्यक्षस्थलएवा
नुमितिसाधारणतत्प्रकारकानुभवत्वावच्छिन्नंप्रत्येवतदुपनपत्वेन हेतुत्वात्सामग्र्यंतरकल्पना हेरंबं

तत्प्रकारकपक्षसत्त्वावच्छिन्नप्रतीतियात्वेऽप्रसिद्धसाध्य(क)स्थल इवाप्रसिद्धसाध्यकस्थलेप्यनुमितेः साध्य
विशेषणकत्वापत्तेरिति वाच्यं विशेषविषयातद्भावविधेयकानुमितित्वावच्छिन्नं प्रत्येव तद्व्याप्यकाभाव
वत्तानिश्चयस्य हेतुत्वे नापरामृष्टसाध्यकानुमितौ विशेषणत्वाविशेषणत्वासंभवात् उपनीतविशे
ष्यकमनसाद्यनुरोधेनादलौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तदुपनयत्वेन हेतुत्वात् नादृशानुभव
त्वावच्छिन्नं प्रत्युपनयस्य हेतुत्वेपि कांचनमयवह्नित्वावच्छिन्नविधेयकानुमितौ तादृशवह्नित्वावच्छि
न्नव्याप्यवत्तानिश्चयस्य कांचनमयत्वनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितौ च
कांचनमयान्यवह्नेर्वा धर्मेनिश्चयस्य विशेषणसामग्रीत्वात् तद्विरहादेवमुक्तवह्नेः परामर्शादुपनीत
कांचनमयत्वप्रकारेण वह्नेरनुमित्यसंभवाच्चेति भाव उपनीतेत्यस्योत्तरवाधानवतारदशायामित्या
दिस्तेन राशभान्यावह्नेर्वाधदशायां परामर्शादेवरासभिन्यवह्निमानीत्यमनुमीत्येरानुभविकत्वेपि

नश्यतीति ननु विशेष्ये विशेषणमित्यादिन्यायेन काञ्चनमयत्वादिकाञ्चनमयवह्नित्वाद्यनुमितिरितरवाधसत्वाद्य
वादिप्रतिसंधानस्य च विशेषतो न नेतत्कार्यकारणभावः कॢप्यते गौरवात् किंतु लाघवात् तत्प्रकारका
नुमितौ तद्भानत्वेनैकमेकहेतुत्वमितरोपनीतभानत्वमावश्यकमत आह अन्यथेति उपनीतज्ञानादेवा
नुमितौ भानस्वीकार इत्यर्थः लिंगोपधानपक्षस्य प्रामाणिकत्वे वह्नेर्हेतुलायां पर्वतः प्रमेय इत्यनुमि
तेलिंगविषयकवह्निमत्तानिश्चयत्वात्ततो वह्न्यर्थिनः प्रवृत्तिर्भवत्येवेत्यत प्रमेयत्वादिनेत्युक्तं प्रवृत्त्या
पत्तिरिति तथा च गतितरासंभवादेवेतरवाधादेर्विशिष्टानेतत्कार्यकारणभावः स्वीकर्त्तव्य इतिभा मूले पक्ष
धर्मताबलादनुमित्सायां प्रसिद्धमाहानसीयवह्न्यादिकं स्ववाधात्सिद्ध्यतीति भावः पृथग्गोप इत्यर्थः
विदितो नलथेति न विशेषतो महानसीयवह्नित्वादिप्रकारेणानुमितेः संभवेनेत्यर्थः तथा च कुत्र विशे
षतो वाधः प्रतिबंधकः स्यादिति भावः सामान्यतो वह्नित्वादिसामान्यप्रकारेण विशेषतो वाध इति महानसीय हेरं ल

वह्निधर्म इत्यस्यार्थमित्रेति अन्यथा गृहे घटो नास्तीति निर्णयदशायां द्रव्यमस्तीति धीर्न स्यादिति भाव ननु तद्व्यक्ति
वैशिष्ट्यावगाहिज्ञानं प्रति तद्व्यक्तिप्रतियोगिकाभावनिर्णयत्वेनैव समानविषयतया प्रतिबंधकत्वं न तु तद्धर्मा
वच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन समानप्रकार
तया तथात्वं तत्तद्व्यक्तिमात्रवृत्त्यनन्तधर्मान्तराभावेनानंतहेतुत्वकल्पने गौरवात् गृहे घटो नास्तीत्यनन्तरं
द्रव्यमस्तीति प्रतीतेर्घटान्यद्रव्यावगाहित्वेनोपपत्तेस्तथा च महानसीयवह्नौ लाघवप्रतिसंधानादिब
लाज्जायमानावह्नित्वप्रकारेणापि महानसीयवह्निविषयिण्यनुमितिः कथं महानसीयवह्नेर्बाधनिश्चय
सति स्यात्तादृशबाधनिश्चयस्यापि तद्विरोधित्वादित्युपाध्यायमतमाशंक्य निराचष्टे न चेति संशयादिति तथा
च तत्तद्धर्मान्तराभावे प्रतिबंधकतायां गौरवमिति प्रामाणिकत्वाददोषे यमन्यथा तद्रूपाभावस्य निश्चयस
त्वाद्द्रव्यत्वेनापि तद्रूपस्य संशयो न स्यादिति भावः ननु तत्संशयविरोधाद्वरंशप्रक्षं प्रत्येव समानप्रकार

38

कत्वेन विरोधित्वमस्तु परोक्षबुद्धौ तु तत्समाविषयकत्वे नैव त[illegible]यं थास्तं लाघवादत आह तदुपनीतस्यानुमि
तेश्चेति ननु तत्तद्रूपाभावस्य निर्णयेन प्रतिबन्धात् तत्संशयादौ रूपत्वेन तत्तद्रूपं न प्रकारः तत्तद्रूपं न प्रकारः
किंतु रूपभिन्नवस्त्वंतरमेतदर्थे साशंका प्रतिषेधति नचेति रूपभिन्नमेव रूपत्वे शंकितं रूपं नचेति शेका वि
षयीभूतं तद्विषयो वा यः रूपं नवेत्यादिधीविषय इत्यन्वयः रूपवान्नवेत्यादिबुद्धेः रूपत्वविशिष्टवैशिष्ट्यावगा
हित्वेपि तत्र विशेषणतावच्छेदकीभूतरूपत्वाप्रकारकनिश्चयो न हेतुर्विशेषणांशधर्मितावच्छेदकोतरासा
त्वस्थले एव तादृशनिश्चयत्वेन हेतुत्वात् किंतु विशेषणतावच्छेदकीभूतरूपत्वप्रकारकज्ञानमात्रं तथे
तिभावः ननूक्तेपि विशिष्टवैशिष्ट्यज्ञानरूपत्वप्रकारकनिश्चयत्वेनैव हेतुत्वं संशयसाधारणतत्प्रकारकज्ञा
नमात्रस्य तथात्वे तदप्रामाण्यनिश्चयाभावस्य प्रयोजकत्वकल्पनागौरवापत्तेरत आह आरोपितेनेति तथा
च रूपमेव रूपत्वप्रकारेण निश्चयविषयीभूतं संदिग्धरूपवान्नवेत्यादिधी विषय इति विशेषणतावच्छे हेरंबः

दकप्रकारकनिश्चयेऽपि नासंभावितभावस्तादृशेति रूपभिन्नधर्मिकरूपत्वप्रकारकसंशयो ...पे सेयोर्विरहे

ऽपि सर्वः तयोर्वायुधर्मिकयोः रूपवत्तासंशयानुत्पत्तेः ननु पृथिव्यादिरूपस्य बाधनिश्चयदशायामतिरिक्तरूप

संभावनस्यैव वायुरूपवान्वेत्यादौ करोविरोध अतिरिक्तसंभावनविरहविशिष्टस्यैव तदभावनिश्चयस्य वि

रोधित्वादिति ब्रूयात्तद्वाप्याहाद्दोषविशेषादिति यद्यपीनेह श्रुतमित्येव वक्तुमुचितं न च श्रुतशब्दस्य गुणपर

त्वभ्रमवारणाय द्रव्यपदं --- वनिर्देशादेव तद्भ्रमव्युदासात् तथापीनेह श्रुतशब्दपुंलिंगनिर्देशापत्तेः गुणे श्रु

त्वाद्यः पुंसीत्यनुशासनात् तथापि समवायेन सोऽस्य विशिष्टस्य लाभार्थं द्रव्यपदं अन्यथा कालमादिलि

प्तस्य स्यामादेरपि परंपरया श्रुतत्वात्तदभावनिर्णयेऽपि --- तस्पर्शकादेर्विशिष्टज्ञाने बाधकाप्रा प्तेरितिभा

वः नन्विह शंख--रव इत्यादिदर्शनेन परोक्षविशिष्टबुद्धिस्थले समानविषयत्वेन विरोधिनापावाधकमतआह

घटपटौ न स्त इतिन न्तत्कनिश्चयस्य घटपटोभयत्वावच्छिन्नत्वप्रतियोगिताकत्वेन घटाभावस्यैवावगाहि

३८
३१

त्वात्तदुत्तरं घटोऽस्तीति प्रत्यक्षे बाधकाभावः। अत्रैव प्रतियोगिभावस्यैव घटत्वावच्छिन्नप्रतियोगिताकत्वोपगमात् तदाहुः चदं
डी चैत्रो नास्तीति न चात्र पदं दंडी चैत्रत्वावच्छिन्नप्रतियोगिताकत्वेन मैत्राद्यभाव एव भासत इति तदुत्तरं चैत्रोऽस्ती
ति प्रत्यक्षे बाधकाभाव इति वाच्यं तादृशभ्रमसामग्र्या अनावश्यकत्वात् अन्यथा तत्त[illegible]टादिव्यक्तिविशिष्टबु
द्धिं प्रति तत्तद्घटादिप्रतियोगिकाभावनिश्चयत्वेन भिन्नविषयकज्ञानस्यापि विनिगमनाविरहेण प्रतिबंधकत्वा
पत्तेः घटो नास्तीत्यादिनिश्चयस्य पटत्वावच्छिन्नप्रतियोगिताकत्वेन घटाद्यभावभ्रमत्वस्वीकारेऽपि तदुत्त
रं घटोऽस्तीत्यादिबुद्धेः संभवित्वात् घटो नास्तीत्यादिनिश्चयस्य घटत्वावच्छिन्नप्रतियोगिताकत्वेन पटाद्यभा
व[illegible]भ्रमत्वस्वीकारेऽपि तदुत्तरं घटोऽस्तीति बुद्धेरनुत्पादसंभवादिति भावः। ननु समानप्रकारकत्वेनै
व विरोधित्वे महानसीयवह्नेः बाधनिश्चयदशायामपि सालिंगपरामर्शाद्दत्तप्रकारेण तादृशेव वह्नेरनुमा
नुमितिः स्यादत आह प्रतिबंधिमाह सालिंगोत्सादिवत्स्वर्च्चः विशेषेति समानप्रकारकत्वेन विरोधित्वमते हेरंब·

महानसीयवह्नेर्बाधदशायामिव समानविषयकत्वेनाविरोधित्वमतेऽपि तादृशवह्निर्वोधानन्तरदशायामुक्त
क्रमेण भ्रमानुमितिप्रसंगा समानेत्यस्यार्थः यदि पर्वतो वह्निमानित्यनुमितेर्बोधत्वप्रकारेण महानसीयव
ह्निप्रकारकत्वेऽपि न भ्रमत्वं वह्नित्वावच्छिन्नाभाववति वह्नित्वावच्छिन्नप्रकारताकज्ञानस्यैव वह्नित्वा
वच्छिन्नस्य भ्रमत्वादित्युच्यते यदि वा – मौत्सर्गिकं प्रामाण्यमित्यस्य रक्षायैव वह्नित्वादिप्रकारेण महानसीय
वह्न्यादेर्भ्रमानुमितिहेतुत्वेन विशिष्यदोषाः कल्प्यन्ते तदा समानप्रकारकत्वेन विरोधितामतेऽप्युत्तलस्य वच
नेसाशयेनाहासमान समाधानमिति व्यापकतेति व्यापकतावच्छेदकत्वेनाग्रहीतमपीत्यर्थः लाघवज्ञानादि
त्यादिना तदितरबाधनिश्चयस्योपग्रह लाघवज्ञानस्य सहकारितास्थलमाह पदेति व्यापकतावच्छेदकीभूत
स्य ज्ञीवनप्रतियोगितत्वस्याप्रकारत्वे दोषमाह अन्यथेति ज्ञीवित्वग्राहकप्रमाणान्तरस्य तदानीमसत्त्वादि
तीति भावः । ननु ज्ञीवित्वानीऽयेऽपि हेत्वंतरेणोवव ह्नेः सत्त्वानुमानं भविष्यतीत्यत आह एवमिति इत्यादि

कं कर्तृजन्यं कार्यत्वाद्दित्यत्र क्षित्यादिकर्तुरेकत्वमपि लाघवज्ञानवशात्प्रकारो भविष्यतीत्यर्थः अत्रैकत्वं न संख्याविशे
षः कर्तृनानात्वेपि तत्संभवात् नापि विशिष्टितं तन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकं तथा प्रकृतानुमिते पूर्वं क्षिति
कर्तृस्य प्रसिद्ध्या तदितर भाव्यलाघवस्यासंभवात्तथाप्येकत्वमद्वितीयत्वं तच्चाचेतनभिन्नासमवेतजीवतदितरा
वृत्तिद्वित्वस्यानाधिकरणत्वं तादृशं च द्वित्वं जीवरूपपर्याप्तमेव प्रकृतं ईश्वरघटयोर्द्वित्वं न चेतनभिन्नासमवे
ता जीवेश्वरयोर्द्वित्वं च न जीवतदितरावृत्तीति तदधिकरणत्वेपि नेश्वरस्य निरुक्तैकत्वबाधः यत्तु कर्तृपर्या
प्तद्वित्व जीवावृत्तिद्वित्वोभयशून्यत्वमित्येकत्वं जीवावृत्तिद्वित्वस्य कर्तृमात्रपर्याप्तत्वेपि कर्तृरूपापत्तिगौरवेण ता
दृशद्वित्वद्वयाभावस्यैव क्षित्यादिकर्तर्यभ्युपगमात् तादृशैकत्वं च घट एव प्रसिद्धमिति तन्न उक्तं कर्तृपर्याप्तस्य
जीवेश्वरयोर्द्वित्वस्य जीवावृत्तस्य च नानेश्वरयोर्द्वित्वस्याधिकरणत्व ईश्वरस्यानिरुक्तद्वित्वद्वयशून्यत्वा
भावात् एकत्वं अद्वितीयत्वं तच्च निरुक्तद्वित्वमिति परमार्थः तथापि कर्तृपर्याप्तद्वित्वद्वयशून्याधिकरणता हेरंकं

कस्वसमानाधिकरणद्वित्वसामान्यैकत्वमेवद्विकर्तृरेकत्वं तन्मतमपि मंदं स्वत्वस्याननुगतत्वेन घटादि
निष्ठैकत्वस्य स्वपदेनोपग्रहे क्षितिकर्तृतारेतत्सधानाधातिरिक्तस्य ईश्वरीयैकत्वस्याप्रकृतानुमितेः पू
र्वमसिद्धत्वादिति ध्येयं अन्यथा लाघववशादेकत्वस्याभावेन प्रकारांतरेण क्षितिकर्तुरेकत्वानिर्णयदशायां
तत्रैकत्वसंशयो भवत्येवेत्यत आह अनुमितेश्चेति ताद्रूप्येणेति यदुपविशिष्टे घावप्रतिसंधानं तत्प्रकारेणे
त्यर्थः तथाविधेति यद्रूपविशिष्टे लाघवं तद्वच्छिन्नावगाहित्वेनानुमित्यनुव्यवसायविरहादित्यर्थः नासिद्धे
तिद्वितीयमायाभावाद्व्यापकतावच्छेदकरूपेणालघ्वर्थविषयताकानुमितित्वावच्छिन्नप्रसव लाघवज्ञानस्य
सहकारित्वकल्पनाया अप्यभावादिति भावः लाघवज्ञानस्य लेवाधासंकरमपसंहरन्नाह इष्टं चेतिमाह
नसिपवक्रौ लाघवप्रतिसंधानबलाद्वह्निसामान्यस्यापरामर्शवह्नौ ।सि॰ति वाधप्रतिबंधाद्यनोबाधः प्रथमद्वे
षद्वस्यार्थः नच्चैवं महानसीयवह्नेस्तदन्यवह्नेश्च बाधनिश्चये वह्निसामान्यानुमितिः स्यात् वह्निसामान्य

सपरामर्शसत्वादितिवाच्यं विशेषाभावरूपस्य वह्निसामान्याभावव्याप्यत्वात् हेतुः इष्टत्वात् अन्यथा तस्यैव विरोधि
त्वादिति भावः शंकते सल्लिंगेति लाघवज्ञानादिसत्वोक्तादिपदग्रहात् तस्य तरबाधस्य संकरकालत्वस्य लाभमाह
यथेति न चैत्रो भुङ्क्ते पिनद्धादिसत्त्व रात्रितरभोक्तृत्वस्य बाधनिर्णय रात्रौ भुंक्ते इत्याकारानुमिति जायत इत्यर्थः
इतरबाधस्थले बाधासंकर -- यति एवमिति पृथिव्यादिति गंतानां मनोभिन्नाचेतनत्वेन परिग्रहः तथा
च इच्छा इत्याश्रितागुणत्वादि सत्र मनोभिन्नचेतनद्रव्यवृत्तित्व - बाधनिर्णयदशायां मनु रूपाचेतनत्वेन
द्रव्यवृत्तित्वप्रकारेणाजायमानानुमितिर्मनोवृत्तित्वाभावप्रमया प्रतिबध्यत इति मनुवृत्तित्वाभावरूपो वि
शेष्यबाधो दोष इत्यर्थः अत्रेदमवधेयं महानसीयान्यवह्नेर्बाधनिश्चयो येन महानसीयवह्नित्वावच्छि
न्नविधेयतानुमितौ हेतुभूतबुद्धेः परामर्शाद्विशिष्टवह्नित्वावच्छिन्नविधेयताकानुमित्यसंभवात् विशि
ष्टपक्षवह्नेः परामर्शादुत्पन्नायां तादृशानुमितौ व्यभिचाराच्च किंतु महानसीयत्वनिष्ठप्रकारतानिरूपि हेरंब०

ताऽसिंभुधवह्नित्वावच्छिन्न विधेयताकानुमितित्वावच्छिन्नं प्रतीतेव महानसीयान्य वह्न्यभाव निश्चयत्वेन हेतुत्वं सर्वत्रैतर
बाधस्थले विशेषणे विशेष्यमिति न्यायेनैवानुमिति स्वीकारात् यद्यप्येवमपि वाह्निर्महानसीयत्वे लाघवमित्येवं प्र
तिबंधानजन्यायां वह्नि सामान्यपरामर्शोत्तर तादृशानुमितौ व्यभिचारः तथाप्यव्यवहितोत्तरत्व संबंधेन तादृशबा
ध निश्चय विशिष्टत्वेनापि कार्य विशेषणान्न दोषः अव्यवहितोत्तरत्वंच यथानुगतानतिप्रसक्तं तथोक्तमनुमितिग्रंथे
अस्माभिः नचैवं तादृशबाध निश्चय विशिष्टत्वमेव कार्यतावच्छेदमस्तु महानसीयत्वनिश्चय प्रकारतानिरूपि
तवह्नित्वावच्छिन्नं प्रकारकत्व प्रवेशो व्यर्थइति वाच्यं भ्रमस्थलेनागृहीतमाणस्य तादृबाधनिश्चयस्य हेतुतया यत्र म
हानसीयान्यवह्निः शून्यः पर्वतो द्रव्यमित्येवं ज्ञान दशायां पर्वतत्वावच्छेदेन वह्निव्याप्यवत्तस्य महानसीयान्य व
ह्न्यबाधस्य च समुहालंबन निर्णय एव तादृशबाधांशे भ्रमत्वज्ञान — — कहः तदव्यवहितोत्तरोत्पन्नायां महान
सीयवह्निमान् पर्वतो द्रव्यं पर्वतश्च वह्निमानित्येवं समुहालंबनानुमितौ व्यभिचारवारणार्थं तद्विशेषणस्यावश

कत्वात् अन्यथा तत्रापि पर्वतो महानसीयवह्निमानित्यनुमितिप्रसंगात् न च गृहीताप्रामाण्यकस्य महानसीयान्य
वह्निर्नास्तीति बाधस्य निश्चयोत्तरं महानसीयवह्निभिन्नवह्निर्नास्तीति निश्चयादपि महानसीयवह्निमानित्यनुमि
त्युत्पत्त्या व्यभिचार तदप्रामाण्यज्ञानेव्याप्तेरनुत्तेजकत्वेतु तृतीयक्षण एव तादृशानुमित्यापत्तेरित्थं महान
सीयवह्निभिन्नवह्निर्नास्तीति बाधनिश्चयस्य महानसीयवह्न्या[illegible]त्मकवह्निमानित्याकारकानुमितिप्रसक्तेव हे
तुतया महानसीयवह्निमानित्यनुमितेरेव तत्रानुत्पादात्तद्यादृशेतरघटितसामान्यस्य वा निर्णयस्तद्घटितसामा
न्यप्रकारकानुमितिं प्रत्येव तादृशबाधनिश्चयस्य हेतुत्वात् तत्राप्रामाण्यज्ञानानास्कंदितमहानसीयान्यवह्न्य
भावनिश्चयोत्तरं महानसीयवह्नित्वावच्छिन्नप[illegible]रामर्शात्तादृशवह्नित्वावच्छिन्नविधेयताकानुमितिः सा
पि महानसीयत्वनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नप्रकारताकैवतादृशप्रकारताकबुद्धित्वस्यैव महानसि
यत्वावच्छिन्नव्याप्यवत्तापरामर्शातादृशवह्नित्वावच्छिन्नाभावनिश्चयप्रतिबध्यत्वात् च तथा च तत्रैवागृहीताप्राम हेरंब.

एवं कस्य महानसीयान्यवह्न्यभावनिश्चयस्य हेतुतायां निरुक्तव्यभिचार इति वाच्यं तादृशानुमितेर्महानसीयत्वनिष्ठप्रका
रतानिरूपितवह्नित्वावच्छिन्नप्रकारताकत्वेपि महानसीयत्वनिष्ठप्रकारतानिरूपितसिद्धवह्नित्वावच्छिन्नवि
धेयताकत्वाभावादेव व्यभिचारासंभवात् विशिष्टवह्नित्वस्यैव तत्र विधेयतावच्छेदकत्वात् एवं महानसीयो वह्निर्ना
स्तीत्यादिनिश्चयो महानसीयान्यत्वनिष्ठप्रकारतानिरूपिततद्वह्नित्वावच्छिन्नविधेयताकाया महानसीया
न्यवह्निमानित्यनुमितौ हेतुः एवं महानसीयान्यां अरूपवह्निर्नास्तीत्याकारनिश्चयो महानसि मतरूपेण
तोभयप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताकात्मक महानसीय्यारूपवह्निमानित्यनुमितौ हेतुर्ने
तु महानसीयत्वविशिष्टारूपत्वनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितिं प्रत्येव तस्य हेतुत्वं
महानसीयारूपत्वान्यवह्निर्नास्तीत्येवं बाधनिश्चयादेव तादृशानुमित्युत्पादेन व्यभिचारात् एकत्र द्वयमिति सा
कारक विषयताया अप्युक्तस्थलमेवोदाहरणं। तत्रैकस्यां प्रकारतायां प्रकारताद्वयनिरूपकं तत्रैव न स्वीकारात्

त्वरूपा द्रव्याश्रितो गुणत्वात् इत्यादौ तु पृथिव्यात्मकद्रव्यवृत्तित्वत्वावच्छिन्नाभावत्वप्रकारकनिश्चय एव पृथिव्याद्यन्य
द्रव्यवृत्तित्वप्रकारकानुमितौ हेतुर्न तु प्रतिव्याद्विवृत्तित्वाभावप्रकारकनिर्णयः सामान्यघटितविशेषबोधस्यैवत
यात्वात् तथा गुणवृत्तित्वाभावनिर्णयदशायामिकाशगुणान्यद्रव्यवृत्तित्वानुमित्यापत्तेः नच गुणवृत्तित्वं न प्रवृत्ति
त्वस्य विशेषणमिति तद्बाधनिर्णये प्युक्तानुमितिर्नेतिवाच्यं सामान्यविशेषभावस्याविवक्षितत्वात् अन्यथा वह्निमान् धू
मादित्यादौ नीलान्यवह्न्यभावप्रकारकनिश्चये नीलवह्निमानित्यनुमितेरनुत्पत्तिप्रसंगात् नीलस्य वह्निवि
शेषणत्वाभावात् एवं प्रकृते पर्वते वह्नेः परामर्शादपि काञ्चनमयोऽयं पर्वतो वह्निमानित्येवं बाधदशायां काञ्चनमयः
पर्वतो वह्निमानित्यनुमितिर्जायमाना पर्वतः काञ्चनमयो नेति प्रमया प्रतिबध्यत इति तद्भिन्नविषयिभूतकाञ्चनमयत्वाभाव
विशिष्टः पर्वतोपि बाध एव न तु सिद्धिःकारणीभूतपरामर्शो विरोधी तथा इत्यादिविकल्परं स्वयमूहनीयमिति दिक्
कपिसंयोगी एतत्वादित्यादि सद्धेतौ व्यभिचारित्वापातादाह किंतु इत्यादि कमिति संबंधविशेषेति साध्यतावच्छेद हेत्व

कसंबंधावच्छिन्नेत्यर्थः नियामकसंबंधमात्रस्यप्रतियोगितावच्छेदकत्वमादायसदंतेन चैत्रो गोमानद्रव्यत्वादित्यादौ
स्वामित्वसंबंधेन साध्यतायाः व्यभिचारेणानाव्याप्तिः स्वत्वे नेति तद्ध्वंसप्रागभावावच्छिन्नो घटस्तद्ध्वंसवानूल
द्रव्यत्वादित्यादौ तत्तत्कालावच्छिन्नतत्तद्ध्वंसाद्विमत्तावुधौ तत्तत्कालावच्छिन्नतत्तद्ध्वंसप्रागभावनिश्च
यस्यविरोधित्वात्तद्विषयस्य तत्तत्कालावच्छिन्नतद्ध्वंसप्रागभावादेर्बाधत्वस्यस्पष्टत्वेन सर्वसंमतत्वेने
त्यर्थः स्वमतेतु तत्तत्कालावच्छेदेन तत्तद्ध्वंसाभावस्यापि तत्रबाधत्वं संभवतीत्याह तत्रेतिप्रतियो
ग्याधेयेति धर्मिणीति प्रागभावाद्यकालावच्छेदेन तत्तद्ध्वंसाभावस्यव्याप्तिवादेषु साधितत्वादित्यर्थः अतए
वेति तत्प्रागभावाद्यकालावच्छेदेन तद्वत्यपि तद्ध्वंसाभावस्यसत्वादेवेत्यर्थः निराबाधमिति तत्कालावच्छिन्नघ
टधर्मिकरूपत्वावच्छिन्नवत्ताबुद्धौ तत्कालावच्छिन्नघटधर्मिकरूपत्वावच्छिन्नाभावनिश्चयस्यवि
रोधित्वात्तद्विषयस्यैव तत्रबाधत्वात् अन्यथा श्यामतादशायां घट एवप्रागभाववत्तानिश्चयेपि तत्कालावच्छिन्नरूप

वत्ताज्ञानोदये न साध्यतावच्छेदकीभूतरूपत्वावच्छिन्नवत्ताबुद्धिप्रतिरूपप्रागभाववत्तानिश्चयस्याविरोधित्वेन तद्वि
षयस्य बाधत्वायोगात् रूपत्वावच्छिन्नप्रतियोगिताकत्वेमानाभावात् न तत्कालावच्छिन्नतत्तद्व्यक्तित्वावच्छिन्नप्र
कारताकबुद्धिं प्रत्येव तत्तत्कालावच्छिन्नतत्तद्व्यक्तिप्रागभाववत्तानिश्चयत्वेन प्रतिबंधकत्वादिति भावः। शिखरा
वच्छिन्नः पर्वतो वह्निमान् धूमादित्यादावपि अंसिंवीर्ल बाधसंभवात् मूल - न्यूनतामपाकुर्वन्नाह एवमिति घटत्वा
त्वादेवेति पंचमीप्रसंगादिति। पंचपक्षतावच्छेदकावच्छेदेनानुमितौ तादृशधर्मविशिष्टबाधनिश्चयाभाव —
पकइतितच्छत्वेभागासिद्धिः साधनादपि तादृशानुमितिरिष्टैवेति वाच्यं। अनुभवविरोधात् संयोगमात्रेण वह्न्यादेर्व्या
पकतावगाहिनः पर्वतत्वावच्छेदेन धूमवत्तापरामर्शात् पर्वतत्वावच्छिन्नसंयोगेनैव पाषाणमयत्वावच्छेदसंयो
गेनापि पर्वते वह्न्यनुमितिप्रसंगाच्च तादृशसंबंधेनापि बाधनिश्चयाद्यभावस्यापेक्षत्वात् तादृशसंयोगव्याप
कत्वाग्रहादेव तत्संबंधेन वह्न्यनुत्पादे पर्वतत्वावच्छेदसंयोगेनापि अनुमित्सानापत्तेः तादृशसंबंधेनाव्य हेंब·

नामिद्धत्वनापत्तेः तादृशसंबंधेनापि व्यापकत्वाग्रहस्यानिशिष्टत्वादिति भावः नच इष्टापत्तिरनुभवविरोधादिति भावः न
चासिद्धवरेतित्याच कारणबाधाद्वह्निशिखराद्यवच्छेदेन वह्न्याद्यनुमितेरसंभवात्तत्र तत्र [illegible] बाधस्य विरोधि
त्वे मानाभावादिति भावः अवच्छेदकत्वयोरिति यत्र पक्षतावच्छेदकत्वस्य पृथ्वित्वादेर्व्यापकत्वरूपमवच्छे
दकत्वं साध्यस्यानुमितौ भासते तत्रैव तदवच्छेदेन हेतुमत्ताज्ञानं कारणं शिखरावच्छिन्नः पर्वतो वह्निमानि
त्याद्यनुमितौ तु स्वरूपसंबंधविशेषात्मकमेव शिखराद्यवच्छिन्नत्वं साध्यस्य भासत इति पक्षतावच्छेदकीभू
तशिखराद्यवच्छेदेन हेतुमत्ताज्ञानं तत्र प्रयोजकमिति भावः पृथिवीत्वाद्यवच्छेदेन रूपत्वाद्यनुमितावपि
स्वरूपसंबंधविशेषात्मकमेवावच्छेदकत्वं भासते न तु व्यापकत्वमिति यदि ब्रूयात तदाप्याह अवच्छिन्नत्वान्ते
र्विति: पक्षतावच्छेदकीभूतसिखराद्यवच्छिन्नवृत्तेरपि सर्थः तत्त्वेन तत्त्वेन तादृशशिखराद्यवच्छिन्नवृत्ति
त्वेन न तु तथापि स्वरूपासिद्ध्या सांकर्यमेवेत्यत आह संकरेपीति स्वरूपासिद्धिः बाधात्मकयोर्वस्तुतोऽसं

करेपि इत्यर्थः ननु ज्ञानाशंकेयं एवं भेदो ह्रदो वह्निमान् धूमादित्यादावेव बाधस्य सौलभ्यादुक्तस्थलानुधावनं व्यर्थम
तो वस्तुशंकेयमभ्याह सुखत्वादिति तथा च यत्र खंडने शरीरे सुखं नोत्पन्नं किंतु दुःखं तत्सहितावच्छिन्नात्मा सुखी
दुःखादीत्यादौ पक्षतावच्छेदकीभूत तत्सरीरावच्छेदेन हेतुत्वान स्वरूपासिद्धिः किंतु तदवच्छेदेन साध्यासत्वाद्बा
ध एव दोषस्यान्न चैवं सर्वत्रैवानुमितौ पक्षतावच्छेदकच्छेदकोपलक्षितेन धर्मिणैव साध्यस्याभावादत आह अ
त्र चेति एतत्कालावच्छिन्नवह्निमत्वेति अत्रैव कालावच्छिन्नत्वं वह्नौ प्रकारीभूय भासत इति प्रांच एतत्कालाव
च्छिन्नत्वविशिष्टसंयोगसंबंधेन वह्निः पक्षे भासत इति नव्याः अभिप्रायो मणिकारस्याननुशीलितिक र्तृका शरीराज
न्यत्वादित्यत्र विशेषणीभूतस्याजन्यत्वस्यानुपाधिता संपादकत्वेन साधनव्यापकत्वा[illegible]भिधानं संगतं अंकुरादा
वेव शरीराजन्ये व्यभिचारादत आह साध्यस्येति शेष इति ननु शरीराजन्यस्यापि सकर्तृकत्वसंभवात्तथापि
अप्रयोजकत्वानुमानस्यात आह शरीरसहकारेणेति ननु साध्यस्य साधनव्यापकत्वं नै विशेषिभूत हेरंब.

तस्यानन्यत्वस्यानुपाधित्वे अतो बीजमतः फलितार्थमाह तथा चेति हेतोरव्यापकतयेति साध्याव्याप्या व्यापकस्य
साध्याव्यापकत्वनियमादिति भाव एतद्दूत एव क्वचिद्दूषितमिति ग्रंथ किंचेत्यादि मूलस्याभिप्रायं प्रकाशयन्नाह यदि
त्वादि निशिष्टाभावे शरीरजन्यत्वादिरूपे विशेषणे स्वेति शरीरात्मक विशेषणस्येत्यर्थः व्यभिचारबाधकत्वादि
ति विशेषणस्य वैयर्थ्यः — मइसन्वय न चेवं घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैव व्यंजकत्वादित्यत्रा
पि पूर्ववद्रूपादिसत्वस्य व्यभिचारवारकत्वान्मूलोक्तवैयर्थ्यत्वादवस्थमत आह रूपादिष्वित्यादि। क्षित्यादिगं
धव्यंजकत्वस्य हेतोर्व्यभिचारे मनःप्रभृतौ तस्येति मुद्देवकारार्थस्येत्यर्थः॥ध्री॥ ॥समभीतिषध्यंगंतेधपद
समभिव्याहारादित्यर्थः विशेषणत्वेतिरगंधव्यंजकत्वांसे विशेषणत्वापोगादित्यर्थः तावन्मात्रस्यालोका
दि व्यभिचारित्वादिति भावः रूपादित्यादि रूपाद्यतिरिक्तांतर्गतं यज्ञेधसातिरिक्तेतद्व्यंजकत्वात्तत्वोति
मनःप्रभृतीनां गंधव्यंजकत्वेपि रूपादिव्यंजकत्वाद्देवद्विशिष्टहेत्वभावादिति भावः अत्र रूपादित्यादिप

देपदेन विरोधाभावात् द्वयोरेव व्याप्यत्वादित्येवं मूलमभिप्रेत्याह नद्वीति वह्नौ जनप्रतियोगिकान्योन्याभावादित्यर्थः अन्य
तरेति अन्यतरा जन्योन्याभावस्य जन्यप्रतियोगिकत्वाभावादितिभावः अथापृथिवीत्वं यदि पृथिवीत्वादसंता
भावः तदा ग्रीष्मेण यौनरुक्त्यं न बहुत्वासंभवश्चेत्यतोऽभ्याचष्टे पृथिवीनामन्योन्याभाव इति ननु पृथिवी
त्वावच्छिन्नान्योन्याभावस्यातिरिक्तत्वे बहुत्वासंभवतादवस्थ्यमत आह यद्येतित्तत्पार्थिवीभेदसमु
दाय इत्यर्थः समुच्चये हेतुमाह जन्यत्वस्यत्यादि जन्यत्वस्यातिरिक्तत्वमते अखंडत्वसंभवादाह एकस्ये
ति एकस्यापि जन्यत्वस्य कारणताभेदेन नानात्वादितिभावः तुल्यन्यायतयेति जन्यत्वसामान्यान्योन्याभा
वतुल्यत्वेनेत्यर्थः अन्यथा जन्यत्वावच्छिन्नान्योन्याभावस्याप्येकस्यैवानुखंडस्य हेतुत्वसंभवादित्यर्थः स
मुदायरूपत्वादिति तथा चास्यान्योन्याभावापेक्षया जन्यत्वत्वाभावकूटस्यैव वाक्तृत्वं व्ययमेकस्मिन्नेव जन्
न्यकारणभेदादनेकजन्यतासत्त्वादितिभावः स्नेहादेः साध्ये बहूनां सीतस्पर्शीनामन्यस्य च जन्यत्वस्य द् हेरब·

पोरेव व्याप्यत्वमुपादयंनेवाकर्तृकत्वे साध्यजन्यान्योन्याभावकूटस्याव्याप्यत्वमाशंकते यद्यपि स्यादित
त्वं॰अव्याप्यत्वं नचेति हेतौ। क्षितिरकर्तृका जन्यान्योन्याभावकूटवत्वादित्यादौ न हि घटादिप्रत्येकान्योन्या
भावस्य साध्यव्यापकत्वमिति स्यर्थः एकैकस्य घटाजन्यान्योन्याभावस्य घटादावकर्तृकत्वव्यभिचारित्वात् शि
तस्पर्शादिसादौ वङ्गनामपि शीतस्पर्शानां प्रत्येकं तत्तेहाव्यभिचारित्वादौ व्याप्यवाधकाभाव इति भावः समु
दायस्य व्याप्यत्वे इति संभवतीति शेषः इत्यत्र दूषणे नासर्वमिति जन्यत्वाद्यभावाभावस्यैकत्वप्रदर्शनेन जन्य
त्वाद्यवच्छिन्नभेदस्याप्येकत्वस्य मूलस्वरससिद्धत्वादिति भावः॥ ॥ कुर्वन्ति नित्यमनुमानमलिकरत्नैकेषा
पाःप्रयासमगदीधिधिस्थितिभाज एषा पुनस्तदपि नैव निजं। निरूढमर्थं प्रकाशयति तेन ममैष यत्नः॥ ॥
श्रीमहामहोपाध्याय जगदीशतर्कालंकारविरचितानुमानमणिदीधितिटिप्पणी समाप्ता॥ ॥ ॥

४७

खंडित